topic 18

# समानाधिकरण उपमान समास

कुत्सितानि कुत्सनैः । कुत्स्यमानानि कुत्सनैः सह प्राग्वत् । वैयाकरणखसूचिः । मीमांसकदुर्दुरूटः ।

पापाणके कुत्सितैः । पूर्वसूत्रापवादः । पापनापितः । अणककुलालः ।

उपमानानि सामान्यवचनैः । घन इव श्यामो घनश्यामः । इह पूर्वं पदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते । पूर्व ~~निपातनियमार्थं सूत्रम्~~ ।

उपमीयन्ते सदृशतया परिच्छिद्यन्ते यैस्तान्युपमानानि सादृश्यनिरूपकाणीत्यर्थः । सामान्य उपमानोपमेय साधारण धर्म, तमुक्तवन्तः शब्दाः सामान्यवचनाः ।

घन इव श्यामो घनश्याम इति व्यधिवद् नान्विह घन इव श्याम इति विग्रहे घनशब्दस्य श्यामशब्दस्य चैकार्थ वृत्तित्वलक्षणसामानाधिकरण्याभावात् कथमिह समासः, इवशब्दापेक्षत्वेनासामर्थ्याच्चेत्यत आह - इह पूर्वपदमिति ।

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।

उपमेयं व्याघ्रादिभिः सह प्राग्वत्साधारण धर्मस्य अप्रयोगे सति । विशेष्यस्य पूर्वनिपातार्थं सूत्रम् । पुरुष व्याघ्रः । नृसोमः । व्याघ्रादिराकृतिगणः । सामान्याप्रयोगे किम् पुरुषो व्याघ्र इव शूरः

पुरुषव्याघ्र इति । पुरुषो व्याघ्र इवेति विग्रहः । अत्र सादृश्यबोधकः शौर्यात्मकः साधारण धर्मः, स इह नोपात्त इति भवति समासः ।

पुरुषो व्याघ्र इव शूर इति, शौर्येण व्याघ्र सदृशः इति भावः । अत्र शौर्यरूपोपमानोपमेयसाधारण धर्मस्य प्रयोगान्न समास इति भावः